# भासविरचितस्य कर्णभारस्य रूपकत्वविचारः दशरूपकानुसारम्

शुभ-माजी*

## Abstract

[नाट्यशास्त्रमर्मज्ञानां कृते सुविचारणीयविषयत्वेन परिगणितस्य महाकविभासविरचितस्य 'कर्णभारम्' इति रूपकस्य दशरूपकप्रतिपादितनियमानुसारं कृतं शास्त्रीयम् अन्तर्भावविश्लेषणम् अत्र उपस्थाप्यते। करुणवीररसयोः अपूर्वसंयोगेन विशिष्टम् इदम् एकाङ्करूपकं धनञ्जयनिरूपितेषु नाटकप्रकरणभाणप्रहसनडिमसमवकाराद्यष्टसु भेदेष्वङ्कसंख्यारसप्रधानतानायकस्वरूपादि-लक्षणविरोधेन असमाविष्टं जातम्। वस्तुतः एकाङ्कत्वैकाहचरितत्वख्यातेतिवृत्तत्वपुरुषपात्रबाहुल्यास्त्रीनिमित्तसङ्ग्रामप्राधान्यादि-लक्षणैः व्यायोगस्य बाह्यसंरचना स्वीकृता। किन्तु अन्ततः गुरुशापमातृवचनदुःखैः विभावितः शोकः स्थायीभावत्वेन स्थापितः इत्येषः उत्सृष्टिकाङ्कस्य आत्मतत्त्वेन परिगण्यते। अत्र कवचकुण्डलदानमाध्यमेन दानवीरतायाः उत्कर्षः साधितः अपि च इन्द्रकर्णयोः मध्यस्थितः वाग्युद्धरूपः सङ्ग्रामः उत्सृष्टिकाङ्कस्य विशिष्टलक्षणं समर्थयति। फलतः भासस्य मौलिकप्रतिभया व्यायोगस्य संरचनायाम् उत्सृष्टिकाङ्कस्य करुणरसप्राणस्य अपूर्वसंयोगः कृतः इति कारणेन इदं रूपकं करुणरसप्रधानः व्यायोगः इति नूतनसंज्ञया अभिहितं सत् संस्कृतसाहित्ये स्वकीयं विशिष्टं स्थानं लभते।]

**कुञ्चिकाशब्दाः—** नाट्यशास्त्रम्, रूपकम्, रसः, कर्णभारम्, नाटकम्, भासः

## प्रस्तावना

नाट्यसाहित्यपरम्परायां भासकवेः स्थानं परममहत्त्वेन परिगण्यते। तस्य विरचितानां नाटकानां सङ्ग्रहाणां 'कर्णभारम्' इति रूपकं विशिष्टेन करुणवीरभावप्रधानत्वेन सहृदयानां चेतसि स्पन्दनं जनयति। अस्मिन् रूपके अङ्गराजः कर्णः युद्धाय सज्जीभूय अपूर्वं हृदयपरितापं अनुभवन् दृश्यते[१]। यद्यपि सः अत्युग्रदीप्तिविशदः समरेषु अग्रगण्यः शौर्ये च धीमान् स्थितः तथापि सम्प्रति स शोकम् उपैति। यतः युद्धकाले तस्य चेतसि वैधुर्यम्

* सहायकाचार्यः, गभर्न्मेन्ट् जेनरल् डीग्री कलेज्, शालवनी, पश्चिममेदिनीपुरे, पश्चिमवङ्गेषु; Email : sbhmajhi5@gmail.com

[१] अत्युग्रदीप्तिविशदः समरेऽग्रगण्यः शौर्ये च संप्रति सशोकमुपैति धीमान्।
प्राप्ते निदाघसमये घनराशिरुद्धः सूर्यः स्वभावरुचिमानिव भाति कर्णः॥ [कर्णभारम् ४]

आपतति । पाण्डवाः युधिष्ठिरादयः तस्य यवीयांसः भ्रातरः इति भावः[२]। निरर्थकम् अस्त्रशिक्षणं मातुर्वचनेन निवारितम् इत्येतस्य वृत्तान्तस्य स्मरणेन शोकाकुलः सञ्जातः किन्तु कर्तव्यं रणशिरसि कुरूणां प्रियं कर्तुम् एवास्ति । तथापि हतोऽपि स्वर्गं लभते जित्वा तु यशः लभते रणे निष्फलता न विद्यते इति वीरभावं दृढं कृत्वा सः अर्जुनं पातयित्वा वनमिव हतसिंहं सुप्रवेशं करिष्यामि इति प्रतिज्ञां करोति[३]। अनेन प्रकारेण 'कर्णभारम्' इति नाटकस्य कथावस्तु करुणरसेन वीररसेन सह संमिश्रितं सत् परिलक्ष्यते ।

नाट्यवेदस्य गूढार्थान् सुस्पष्टं कर्तुं मन्दबुद्धीनां च मतिविभ्रममपनेतुं धनञ्जयेन दशरूपकग्रन्थः प्रणीतः[४]। ग्रन्थकारस्य प्रयोजनं तु अखिलनिगमेभ्यः सारमुद्धृत्य विरिञ्चिना यः नाट्यवेदः कृतः तस्य लक्षणं प्रगुणरचनया सङ्क्षिप्य निरूपयितुम् अस्ति । सः तत्पदैः तस्यार्थं सङ्क्षिप्य करोति येन आनन्दनिस्यन्दिषु रूपकेषु अपि अल्पबुद्धयः व्युत्पत्तिमात्रं फलं प्राप्नुयुः । नाट्यस्य रूपकस्य च परिभाषा सविस्तारम् उपस्थापिता—

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपाद्दृशधैव रसाश्रयम् ॥

[दशरूपकम् १.७]

इतीयं परिभाषा बोधयति यत् रूपकम् इति नाम अवस्थायाः अनुकरणं (नाट्यम्) यत् दृश्यतैव उच्यते । तदेव रूपकं यत् दशप्रकारेण रसानाम् आश्रयभूतमस्ति । अतः दशरूपकं नाट्यलक्षणस्य लक्ष्यलक्षण-निरूपणप्रयोजनेन सिद्धम् । भासकृतस्य 'कर्णभारस्य' रूपकत्वनिर्धारणं दशरूपकप्रतिपादितनियमानुसारं युक्तियुक्तमस्ति । कर्णभारमिति दृश्यकाव्ये एकः एव अङ्कः अस्ति । यद्यपि नाटके पञ्चाङ्काः अपेक्षिताः तथापि तत्र अङ्कः

---

[२] क्रुद्धान्तकप्रतिमविक्रमिणो ममापिवैधुर्यमापतति चेतसि युद्धकाले ॥ [कर्णभारम् ६]
पूर्वं कुन्त्यां समुत्पन्नो राधेय इति विश्रुतः ।
युधिष्ठिरादयस्ते मे यवीयांसस्तु पाण्डवाः ॥ [कर्णभारम् ७]
अयं स कालः क्रमलब्धशोभनोगुणप्रकर्षो दिवसोऽयमागतः ।
निरर्थमस्त्रं च मया हि शिक्षितं पुनश्च मातुर्वचनेन वारितः ॥ [कर्णभारम् ८]

[३] समरमुखमसह्य पाण्डवानां प्रविश्य प्रथितगुणगणाढ्यं धर्मराजं च बद्ध्वा ।
मम शरवरवेगैरर्जुनं पातयित्वा वनमिव हतसिंहं सुप्रवेशं करोमि ॥ [कर्णभारम् १४]

[४] व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः ।
तस्यार्थस्तत्पदैस्तेन सङ्क्षिप्य क्रियतेऽञ्जसा ॥ [दशरूपकम् १.५]

एकाहचरितैकार्थः आसन्ननायकः पात्रैः त्रिचतुरैः युक्तश्च भवति तेषाम् अन्ते एव निष्क्रमणं विधीयते । अतः कर्णभारस्य एकैकाङ्कत्वम् अस्य रूपकस्य विशिष्टतां दर्शयति ।

**नाट्यविषयवस्तुसंक्षेपः**

नान्द्यन्ते सूत्रधारस्य प्रवेशानन्तरं कर्णस्य समीपे युद्धकालस्य उपस्थितिं ज्ञापयितुं भृत्येन शब्दः श्रूयते । संग्रामे प्रविष्टे सति अत्युग्रदीप्तिविशदः अग्रगण्यः कर्णः शल्येन सह रथारोहणाय प्रस्थितोऽपि सशोकमुपैति इति भटेन अवलोकितम् । कर्णेन क्रुद्धान्तकप्रतिमविक्रमिणा अपि युद्धकाले चेतसि वैधुर्यम् आपततीति अनुभवः कृतः । तेन स्वयं कुन्त्यां समुत्पन्नत्वम् तथापि राधेय इति विश्रुतत्वम् च कथितम् अनेन मातुर्वचनेन निरर्थम् अस्त्रं शिक्षितम् इति दुःखम् अनुभूतम् । ततः शल्यस्य कौतूहलेन प्रेरितः कर्णः पूर्वं जामदग्न्यस्य सकाशं गत्वा आत्मानमक्षत्रियं वदन् अस्त्रोपदेशं ग्रहीतुम् आरब्धवान् । कदाचित् गुरौ तस्य ऊरुद्वये निद्रिते सति कृमिणा कृत्ते अपि धैर्यात् वेदनामसह्यत किन्तु उत्थाय रोषानलोद्दीपितेन गुरुणा तं कालविफलानि ते अस्त्राणि सन्त्विति शप्तः । शल्येन अहो कष्टम् इति विलापे कृते कर्णेन अस्त्राणां निर्वीर्यत्वं तथा अश्वानां दैन्येन निमीलितेक्षणत्वं अवलोकितम् तथापि 'अलमलं विषादेन' इत्युक्त्वा हतोऽपि स्वर्गं लभते जित्वा तु यशः लभते इति वीरधर्मः संस्थापितः । अर्जुनं पातयित्वा युद्धे प्रवेशितव्यमिति संकल्पः कृतः । तस्मिन् एव काले ब्राह्मणरूपेण शक्रः इन्द्रः वा महत्तरभिक्षाम् याचमानः कर्णेन आहूतः । येन दीर्घायुष्यं परित्यज्य यशः अक्षयत्वेन प्राप्तव्यम् इति घोषितम् । कर्णेन गोसहस्रम् अश्वसहस्रम् वारणवृन्दं कनकम् पृथ्वीम् अग्निष्टोमफलञ्च दातुं प्रयत्नः कृतः अपि शक्रः तत्सर्वं नेच्छामीति प्रत्याख्यातः । अन्ते स्वशिरो दातुं उद्यते कर्णे सति शक्रः अङ्गैः सहैव जनितम् देहरक्षास्वरूपम् कवचं कुण्डलाभ्यां सह याचितवान् । शल्येन 'न दातव्यम्' इति वारितोऽपि कर्णेन 'हुतं च दत्तं च तथैव तिष्ठति'[५] इति वदता तद् निकृत्य दत्तम् । शल्येन 'वञ्चितः भवान्' इति अपमाने कृते कर्णेन 'शक्रः खलु मया वञ्चितः' इति अहङ्कारेण घोषितम् यतः अनेन दानेन पाकशासनः कृतार्थः जातः । तदनन्तरं देवदूतेन प्रविश्य पुरन्दरेण प्रदत्ता विमला नाम शक्तिः प्रतिग्राह्या इति निवेदितम् । कर्णेन 'दत्तस्य न प्रतिगृह्णामि'

[५] कर्णभारम् २२

इति अस्वीकृता सा शक्तिः ब्राह्मणवचनात् स्मरणे लभ्या इति शर्तेन गृहीता । अन्ते कृष्णस्य शङ्खध्वनिं श्रुत्वा अर्जुनस्य युद्धार्थं कोपितत्वम् ज्ञात्वा कर्णेन पुनश्च शल्यं रथम् अर्जुनस्य दिशि चोदयितुम् आदिष्टवान् । ततः भरतवाक्येन सर्वत्र सम्पदाम् कामनां कृत्वा नाटकम् अवरोपितम् ।

**रूपकसामान्यालक्षणनिर्धारणम्**

नाट्यशास्त्रस्य परिसरे रूपकस्य सामान्यस्वरूपं निरूपयितुम् धनञ्जयेन त्रिविधानां तत्त्वानामपेक्षा प्रतिपादिता । तैः तत्त्वैः एव रूपकाणां भेदाः सम्यक्तया निर्णीयन्ते । एतानि त्रीणि तत्त्वानि वस्तु नेता रसः चेति प्रोच्यन्ते । एतेषां त्रयाणां तत्त्वानाम् एव रूपकभेदकत्वम् अङ्गीक्रियते । एषु यद् वस्तु अर्थात् कथावस्तु तत् पुनः द्विधा विभक्तं भवति । तत्र प्रथमम् आधिकारिकम् इति अभिहितम्[६]। अधिकारः नाम फलस्वामी तस्य नायकः एव प्रभुः भवति—

अधिकारः फलस्वाम्यमधिकारो च तत्प्रभुः ।
तन्निरवर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥

[दशरूपकम् १.१२]

द्वितीयं तु प्रासङ्गिकम् इति कथ्यते । प्रासङ्गिकं वृत्तं तु परार्थस्य अर्थात् नायकस्य प्रयोजनस्य सिद्धये प्रसङ्गतः प्रवृत्तं भवति 'प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः' [दशरूपकम् १.१३] इति । अनेन प्रकारेण रूपकस्य आद्यन्तं स्वरूपं वस्तुनेतारसैः साधितम् ।

यद्यपि भासकविना प्रणीतम् 'कर्णभारम्' इति रूपकं सर्वत्र प्रसिद्धम् तथापि तद् नाटकसंज्ञया युक्तं न भवितुमर्हति यतः नाटकस्य यद् लक्षणं दशरूपके निर्दिष्टं तदत्र न सम्यक्तया उपलब्धम् । नाटकं तु अङ्कबाहुल्येन अपेक्षितं भवति 'पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्' [दशरूपकम् ३.३४] । किन्तु 'कर्णभारम्' इति रूपकम् एकेन अङ्केन एव समाप्यते । एतत् रूपकम् एकैकाङ्कमात्रत्वात् नाटकस्य लक्षणानाम् अपूर्णतां संसूचयति ।

रूपकस्य अन्तर्गतं सूच्यस्य अर्थस्य प्रतिपादनार्थम् अर्थोपक्षेपकाणां पञ्चविधत्वं निर्दिष्टम् अस्ति—

अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् ।

---

[६] वस्तु नेता रसस्तेषां भेदको वस्तु च द्विधा ।
तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः ॥ [दशरूपकम् १.११]

विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ॥

[दशरूपकम् १.५२]

विष्कम्भकः प्रवेशकः च वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकौ स्तः । प्रवेशकस्य लक्षणं यत् अङ्कद्वयस्यान्तः एव शेषार्थस्योपसूचकत्वेन प्रयुज्यते तदत्र असम्भवम् ।[७] 'कर्णभारे' तु नान्द्यन्ते सूत्रधारस्य प्रवेशः विहितः । तदनन्तरं भटः प्रविश्य महाराजायाङ्गेश्वराय युद्धकाल उपस्थित इति निवेदयति । सूत्रधारेण स्वकार्यं प्रस्तुताक्षेपवचनेन चित्रोक्त्या यत्तदामुखम् सूच्यते । प्रस्तावना इति एषः भागः आरम्भिकः एव । यतः 'कर्णभारम्' इति रूपकम् एकैकाङ्कं वर्तते अतः अत्र अङ्कद्वयस्य अन्तरालः न विद्यते । अतः विष्कम्भकप्रवेशकयोः प्रयोगः अत्र न क्रियते यतो हि प्रवेशकः अङ्कद्वयस्यान्तः एव अपेक्ष्यते ।

## अर्थप्रकृतिसन्धिविश्लेषणम्

रूपकस्य प्रधानतत्त्वेषु वस्तु नाम कथावस्तु परमं स्थानम् आरोहति । कर्णभारे आधिकारिकवस्तु कर्णस्य निश्चितं कर्तव्यम् अपरिहार्यं फलागमश्च निर्धार्यते । तस्य रणशिरसि प्रियं कुरूणां कर्तव्यम् इति अभिप्रेतम् ।[८] यद्यपि सः शोकग्रस्तः तथापि तस्य परमं लक्ष्यं यशसः प्राप्तिः । सः चिन्तितवान् हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः[९]। अनेन प्रकारेण वीरभावस्य यशःप्राप्तेः च समग्रफलम् आधिकारिकं वस्तु मन्यते । दानकर्मणा हुतं च दत्तं च तथैव तिष्ठति इति प्रतिज्ञया तस्य यशः अक्षयं भवति ।[१०] दशरूपकानुसारेण अर्थप्रकृतयः पञ्च परिकीर्तिताः ।[११] तासु बीजम् नाम स्वल्पोद्दिष्टः तद्धेतुः ।[१२] अत्र कर्णस्य युद्धसंस्कारः अस्त्रशिक्षणं यद्यपि निरर्थकं जातम्[१३] तथापि

---

[७] दशरूपकम् १.५२-५३

[८] मा तावन्मम शरमार्गलक्षभूताः संप्राप्ताः क्षितिपतयः सजीवशेषाः ।
कर्तव्यं रणशिरसि प्रियं कुरूणां द्रष्टव्यो यदि स भवेद्धनञ्जयो मे ॥ [कर्णभारम् ५]

[९] हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः ।
उभे बहुमते लोके नास्ति निष्फलता रणे ॥ [कर्णभारम् १२]

[१०] शिक्षा क्षयं गच्छति कालपर्ययात्सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च तथैव तिष्ठति [कर्णभारम् २२]

[११] बीजबिन्दुपताकाख्यप्रकरोकार्यलक्षणाः ।
अर्थप्रकृतयः पञ्च ता एताः परिकीर्तिताः ॥ [दशरूपकम् १.१७]

[१२] स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा । [दशरूपकम् १.१६]

[१३] अयं स कालः क्रमलब्धशोभनो गुणप्रकर्षो दिवसोऽयमागतः ।

दुर्योधनस्य हितं साधयितुं कृतसङ्कल्पः बीजत्वेन गृह्यते । सः रणाङ्गणे कुरूणां प्रियं कर्तव्यम् इति दृढं निश्चितवान् । द्वितीया अर्थप्रकृतिः बिन्दुः हि अवान्तरार्थविच्छेदे अच्छेदकारणम् उच्यते ।[१४] यद्यपि कर्णः पाण्डवान् कनिष्ठान् भ्रातॄन् ज्ञात्वा वैधुर्यम् अनुभवति[१५] तथापि सः रथमर्जुनं प्रति चोदयितुम् आज्ञां दत्त्वा कथां निरन्तरं प्रवर्तयति । अत्रैव कथायाः विच्छेदः निवारितः भवति । प्रकरी तु प्रदेशभाक् अस्ति । सा अल्पकालाय फलस्य साधनं करोति ।[१६] इन्द्रेण ब्राह्मणरूपेणागत्य कवचकुण्डलयोः दानयाचनम् प्रकरीत्वेन विज्ञातम् । इदं कार्यं स्वल्पमस्ति किन्तु दानवीरस्य यशः साधयितुं महत्त्वपूर्णम् । यद्यपि पताका सानुबन्धं वृत्तमिति विस्तारितरूपेण नास्ति तथापि कर्णस्य चरित्रं दानस्य माहात्म्येन प्रधानफलमेव ।

फलार्थिभिः प्रारब्धस्य कार्यस्य पञ्च अवस्थाः परिकल्पिताः आरम्भः यत्नः प्राप्त्याशा नियताप्तिः फलागमश्च ।[१७] आरम्भः नाम औत्सुक्यमात्रम् अस्ति ।[१८] भटस्य प्रवेशेन युद्धकालस्य उपस्थितिः सूच्यते । यत्नः तु मुख्यफलस्याप्राप्तौ व्यापारोऽतित्वरान्वितः मन्यते ।[१९] कर्णः शल्यम् आदिश्य रथं चोदयितुं वदति येन सः कर्तव्यं साधयितुं प्रयतमानः दृश्यते । प्राप्त्याशा इति प्राप्तिसम्भवः तन्नाम यत्र उपायापायशङ्काभ्यां फलस्य प्राप्तिः आशङ्क्यते ।[२०] इन्द्रकृतं वञ्चनं ज्ञात्वापि कर्णः देवदूतात् विमलाशक्तेः प्रतिग्रहणम् करोति । इयं शक्तिः अर्जुनं पातयित्वा विजयस्य सम्भावनाम् जनयति । नियताप्तिः तु अपायाभावतः नाट्यफलस्य प्राप्तिः सुनिश्चिता भवति ।[२१] कवचदानस्य माध्यमेन कर्णस्य दानकीर्तिः पूर्णा जाता यतः दानम् अक्षयं तिष्ठति 'हुतं च दत्तं च तथैव तिष्ठति'

---

निरर्थमस्त्रं च मया हि शिक्षितं पुनश्च मातुर्वचनेन वारितः ॥ [कर्णभारम् ८]

[१४] अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ॥ [दशरूपकम् १.१६]

[१५] 'वैधुर्यमापतति चेतसि युद्धकाले'[कर्णभारम् ६]

[१६] प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः ।
सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक् ॥ [दशरूपकम् १.१३]

[१७] अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥ [दशरूपकम् १.१८]

[१८] औत्सुक्यमात्रमारम्भः फललाभाय भूयसे । [दशरूपकम् १.१९]

[१९] प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः ॥ [दशरूपकम् १.१९]

[२०] उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः । [दशरूपकम् १.२०]

[२१] अपायाभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता । [दशरूपकम् १.२०]

[कर्णभारम् २२] । फलागमः नाम समग्रफलसम्पत्तिः ।[२२] युद्धे स्वर्गलाभः अथवा यशोलाभः इति अमोघशक्तेः स्वीकारेण कार्यस्य पूर्णता साधिता ।

अर्थप्रकृतयः पञ्च अवस्थाभिः समन्विताः यथासङ्ख्येन पञ्च सन्धीन् जनयन्ति ।[२३] ते च मुखसन्धिः प्रतिमुखसन्धिः गर्भसन्धिः विमर्शसन्धिः निर्वहणसन्धिश्चेति प्रोच्यन्ते ।[२४] कर्णभारस्य एकैकाङ्कत्वेन सन्धीनां सूक्ष्मविस्तारः न उपलब्धः । केवलं मुखसन्धिः यत्र बीजसमुत्पत्तिः दृश्यते सः युद्धारम्भे स्पष्टं प्रकटितः ।[२५] कर्णः युद्धाय रथं चोदयति इत्यनेन बीजम् उत्पन्नम् । निर्वहणसन्धिः च यत्र बीजवन्तः अर्थाः ऐकार्थ्यमुपनीयन्ते सः चरमभागे उपलब्धः ।[२६] कवचस्य दानम् अमोघशक्तेश्च अङ्गीकरणम् इति कार्यसङ्ग्रहः ऐकार्थ्येन उपसंहृतः येन प्रधानं वस्तु परिसमाप्तम् ।

## कर्णस्य धीरोदात्तत्वं प्राकृतनरत्वं चेति नेतृविचारः

रूपकस्य नेतुः विचारणा नाट्यशास्त्रे महत्त्वपूर्णा मन्यते । दशरूपकानुसारेण नायकस्य विनयत्यागदक्षता प्रभृतयः सामान्यगुणाः अपेक्षिताः । कर्णः शौर्ये च अग्रगण्यः विद्यते । सः अत्युग्रदीप्तिविशदः समरे चाग्रगण्यः स्थितः ।[२७] तस्य सत्त्वजाः गुणाः शोभाविलासादयः सन्ति येषु तेजस्विता धैर्यञ्चात्यन्तमावश्यकम् इति । यद्यपि कर्णस्य धीरोदात्तस्य लक्षणैः सह साम्यं दृश्यते तथापि तस्य चरित्रं सूक्ष्मं विद्यते । धीरोदात्तस्य लक्षणम् इत्थं निरूपितम्—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः ॥

[दशरूपकम् २.४]

कर्णः महासत्त्वेन युक्तः धीमान् स्थितः तथापि युद्धकाले तस्य चेतसि

---

[२२] समग्रफलसम्पत्तिः फलयोगो यथोदितः ॥ [दशरूपकम् १.२०]

[२३] अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ।
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥ [दशरूपकम् १.२१]

[२४] अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ।
मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः ॥ [दशरूपकम् १.२२]

[२५] मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा । [दशरूपकम् १.२३]

[२६] बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ [दशरूपकम् १.४४]

[२७] कर्णभारम् ४

वैमुख्यमापतति । सः युधिष्ठिरादयः तस्य कनिष्ठभ्रातरः इति स्मरन् शोकं वहति । अनेन प्रकारेण अन्तर्विरोधेन विमर्शितेन स तस्य चरित्रस्य शुद्धधीरोदात्तत्वस्य परीक्षाम् अतिक्रामति ।

कर्णः क्षत्रियवंश्यः अस्ति तस्य मानवीयः पक्षः अत्र प्रधानतया प्रकाशितः । गुरोः शापेन अस्त्रस्य वैफल्यवेदना तेन अनुभूता[२८]। विवशाश्वान् दृष्ट्वा तस्य हृदये दुःखं समुत्पन्नम्[२९]। एषः शोकयुक्तः भावः वीररसस्य मध्ये अपि तस्य प्राकृतमानवीयत्वं सूचयति । कर्णस्य चरित्रे दानवीरता अत्यन्तं स्पष्टतया प्रदर्शितः । सः अङ्गैः सहैव जनितं कवचं सह कुण्डलाभ्यां प्रदातुं प्रस्तुतः[३०]। ब्राह्मणरूपेण आगतस्य इन्द्रस्य याचनेन सः गोसहस्रमश्वान् गजान् पृथिवीमग्निष्टोमफलं च प्रदानाय प्रतिश्रुतवान् । त्यक्तस्य वस्तुनः स्थिरत्वं तेन घोषितम् 'हुतं च दत्तं च तथैव तिष्ठति' । अनेन प्रकारेण औदार्यस्य उत्कर्षेण सः दानवीरत्वस्य चरमं निदर्शनं प्रस्तुतवान् ।

## रसविचारः

नाट्यशास्त्रे रसस्य विचारणमवश्यकर्तव्यपर्यायभूतमेकं परमं स्थानम् । रससामान्यसिद्धान्तानुसारं स्थायिभावः एव रसः कथ्यते यदा सः विभावैः अनुभावैः सात्त्विकैः व्यभिचारिभिः भावैश्च सम्यक् आनीयमानः सनास्वाद्यत्वं भवति ।[३१] विभावः भावपोषकत्वेन ज्ञायते[३२] अनुभावश्च भावसंसूचनात्मकः

---

[२८] कृत्ते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात्तदा वेदना ।
उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो
बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते सन्त्विति ॥ [कर्णभारम् १०]

[२९] इमे हि दैन्येन निमीलितेक्षणामुहुः स्खलन्तो विवशास्तुरङ्गमाः ।
गजाश्च सप्तच्छददानगन्धिनोनिवेदयन्तीव रणे निवर्तनम् ॥ [कर्णभारम् ११]

[३०] अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहस्रैः ।
देयं तथापि कवचं सह कुण्डलाभ्याम् ।
प्रीत्या मया भगवते रुचितं यदि स्यात् ॥ [कर्णभारम् २१]

[३१] विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ।। [दशरूपकम् ४.१]

[३२] ज्ञायमानतया तत्र विभावो भावपोषकृत् । [दशरूपकम् ४.२]

विकारः परिगणितः अस्ति ।[३३] समुद्रस्य तरङ्गवत् व्यभिचारिणः भावाः स्थायिभावस्य पोषणार्थं क्षणशः प्रादुर्भूय पुनश्च तस्मिन् लीयन्ते ।[३४] कर्णभारे शोकः हि करुणस्य स्थायिभावः परिलक्ष्यते । भटेन कर्णस्य अभूतपूर्वो हृदयपरितापः दृष्टः । कर्णः स्वयं युद्धकाले चेतसि वैधुर्यम् आपतितम् इति अनुभवति । करुणरसस्य उत्पादनार्थम् अत्र विभावानाम् उपयोगः कृतः । तस्य जन्मवृत्तान्तः पूर्वं कुन्त्यां समुत्पन्नः सन् युधिष्ठिरादयः अनुजाः पाण्डवाः तस्य भ्रातरः इति ज्ञानम् आलम्बनविभावत्वेन उपस्थितः । गुरोः शापेन अस्त्राणि कालविफलानि जातानि मातुर्वचनेन युद्धनिवारितम् इति अभिहितं कष्टम् अस्त्राणां निर्वीर्यत्वम् च तस्य उद्दीपनविभावाः मन्यन्ते । एतेन प्रकारेण शोकः परिपुष्टः जातः ।

एवं करुणरसस्य प्रधानत्वेऽपि वीररसस्य उपस्थापना कविना सम्यक् साधिता । वीररसस्य स्थायिभावः उत्साहः परिगण्यते ।[३५] कर्णस्य शौर्ये अग्रगण्यत्वम् क्रुद्धान्तकप्रतिमविक्रमित्वम् च तस्य उत्साहस्य परिचायकम् । कर्तव्यं रणशिरसि प्रियं कुरूणां साधयितुम् रथम् अर्जुनं प्रति चोदयितुमिति आज्ञा तस्य वीरत्वं सूचयति । वीरस्य दृढव्रतत्वं घोषितम् 'हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः । उभे बहुमते लोके नास्ति निष्फलता रणे' ॥[३६] इति । अनेन प्रकारेण स्वर्गे वा यशसि वा निष्फलतायाः अभावः वीरप्रतिज्ञारूपेण उत्साहस्य चरमं उत्कर्षं दर्शयति ।

अस्थायिभावाः अपि स्थायिनः पुष्टिं कुर्वन्ति । कर्णस्य हृदयपरितापः चेतसि वैधुर्यम् चात्र दैन्यं चिन्ता च व्यभिचारिभावौ प्रकटयतः । दौर्गत्यादिभिः जायमानम् अनौजस्यं दैन्यम् उच्यते 'दैन्यं काष्ण्यर्याभृजादिमत्'[३७] इति । अहितानाप्तेः उत्पन्नं ध्यानं चिन्ता मन्यते[३८] ।

---

[३३] अनुभावो विकारस्तु भावसंसूचनात्मकः । [दशरूपकम् ४.३]

[३४] विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ॥ [दशरूपकम् ४.६]

[३५] वीरः प्रतापविनयाध्यवसायसत्त्व-
मोहाविषादनयविस्मयविक्रमाद्यैः ।
उत्साहभूः स च दयारणदानयोगात्
त्रेधा किलात्र मतिगर्वधृतिप्रहर्षाः ॥ [दशरूपकम् ४.६६]

[३६] कर्णभारम् १२

[३७] दौर्गत्याद्यैरनौजस्यं दैन्यं काष्ण्यर्याभृजादिमत् । [दशरूपकम् ४.१३]

[३८] ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृत् । [दशरूपकम् ४.१५]

दैन्यस्य अनुभावत्वेन इमे विवशाः तुरङ्गमाः तथा निःशब्दाः शङ्खदुन्दुभयः दृष्टाः ।[३९] अपि च शल्यस्य विषादः अपि व्यभिचारिभावः अस्ति । यः दुःखस्य आवेशात् जायते । एते भावाः करुणस्य गाम्भीर्यं वर्धयितुं सहायकाः भवन्ति ।

अङ्गीरसस्य निर्वहणे अद्भुतरसस्य उपस्थापनमावश्यकमिति शास्त्रे उक्तम् 'कुर्यान्निर्वहणेऽद्भुतम्'[४०] इति । कर्णभारे कवचकुण्डलयोः दानस्य अनन्तरं देवदूतेन प्रविश्य पाण्डवेष्वेकपुरुषवधार्थम् अमोघमस्त्रं विमला नाम शक्तिः प्रदत्ता । अत्र देवदूतस्य आगमनम् अमोघशक्तेः अङ्गीकरणञ्चातिलोकैः पदार्थैः सम्बद्धम् । अतः अद्भुतरसस्य विस्मयात्माभावः कश्चित् सङ्केतितः तथाहि 'अतिलोकैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः' [दशरूपकम् ४.७२] इति । अनेन प्रकारेण वीरकरुणयोः प्रधानयोः रसयोः निर्वहणे अद्भुतस्य लेशः नाटके समावेशितः ।

## दशविधरूपकेषु कर्णभारस्य असमावेशस्थलनिर्धारणम्

रूपकेषु अवस्थानुकृतेः रसेषु यत् आश्रयणं भवति तस्य दशधा विभागस्य लक्षणानि सर्वतोभावेन समीक्षणं कृत्वा कर्णभारस्य लक्षणैः सह विरोधः व्यवस्थापनीयः । दशरूपकलक्षणम् अनुसृत्य नाटकम् तथा प्रकरणम् इति द्वौ प्रमुखौ भेदौ अङ्कसंख्यायाः नियमैः बद्धौ स्तः । नाटकम् पञ्चाङ्कम् अवरम् तथा दशाङ्कं परम् कर्तव्यम् इति विज्ञाप्यते ।[४१] प्रकरणे अपि पञ्चाङ्कस्य नियमः प्रायेण नाटकवत् स्वीकृतः । कर्णभारम् नाम रूपकं एकाङ्कपरिमितम् अस्ति यस्य निष्पत्तिः एकस्मिन् एव अङ्के विहिता । अतः अङ्कसंख्यायाः न्यूनत्वात् इदं रूपकं नाटकस्य प्रकरणस्य च श्रेणीतः नैव सन्निवेशयितुं शक्यते । अपि च इहामृगस्य लक्षणम् चतुरङ्कत्वेन प्रतिपादितम् । अस्य चतुरङ्कस्य नियमस्य पालयितुमशक्यत्वात् कर्णभारस्य इहामृगत्वात् बहिष्करणं क्रियते ।

प्रहसनम् इति रूपकभेदः हास्यरसेन प्रधानतया भूयसा युक्तः भवितुम् अर्हति । यत्र विकृताकृतिवाग्वेषैः हास्यस्य निष्पत्तिः विहिता स्यात् ।[४२]

---

[३९] कर्णभारम् ११

[४०] एको रसोऽङ्गीकर्तव्यो वीरः शृङ्गार एव वा ।
अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ॥ [दशरूपकम् ३.३०]

[४१] दशरूपकम् ३.३४

[४२] दशरूपकम् ३.४८-५०

कर्णभारे तु शोकः स्थायी भावः करुणरसश्च अङ्गी रसः भवति । बुद्धिमान् कर्णोऽपि समरपरिच्छदपरिवृतः सन् सशोकमुपैति इति नाटकादौ एव सूचितम् । हास्यरस्य लेशोऽपि अत्र नैव दृश्यते । अपि च प्रहसने पाषण्डी-विप्र-चेट-चेटी-विटाः इत्यादयः पात्राणि भवन्ति कर्णः तु प्रख्यातः राजेन्द्रमौलिमणिरञ्जितपादपद्मः अस्ति । अतः रसस्य पात्रस्य च भेदात् कर्णभारं प्रहसनस्य श्रेणीतः विभेदितम् ।

वीथी इति रूपकभेदः कैशिकीवृत्तौ निबद्धः । अत्र शृङ्गाररसः सूच्यः स्यात् यद्यपि रसान्तरम् स्पृशेदपि[४३] । कर्णभारे तु करुणरसस्य शोकनाम्नः स्थायिभावस्य प्रकर्षेण प्रतिपादितत्वात् शृङ्गाररसस्य तत्र अभावः एव दृश्यते । अतः मुख्यरसस्य भिन्नत्वात् वीथित्वेन कर्णभारस्य स्वीकारः नैव शक्यते ।

भाणः तु एकः एव विटः पात्रं भवति येन आकाशभाषितैः स्वकार्यं उपवर्णयितुं शक्यते[४४] । कर्णभारे तु कर्ण शल्यः शक्रः देवदूतः च इति बहुभिः पात्रैः परस्परं वाग्व्यापारः क्रियते न तु विटेन एकलः प्रस्तुतम् । अतः पात्रसंख्यायाः नियमस्य विरोधत्वात् कर्णभारं भाणात् बहिष्कृतम् भवति ।

समवकारः तु द्वादश उदात्तविख्याताः देवदानवाः नेतारः भवन्ति येषां फलम् पृथक्पृथक् स्यात् । अपि च समवकारे त्रयः अङ्काः त्रयः कपटाः तथा त्रयः शृङ्गाराः अपेक्षिताः[४५] । कर्णभारे तु एकः एव नायकः कर्णः विद्यते अङ्कसंख्या च एका एव अस्ति । अतः नायकबाहुल्यस्य तथा त्र्यङ्कत्वस्य नियमैः समवकारात् इदं रूपकं निषेधितम् ।

डिमः अपि चतुरङ्कः भवितुम् अर्हति तथा षोडशात्यन्तमुद्धताः नेतारः तत्र आवश्यकाः भवन्ति[४६] । कर्णभारे तु न्यूनपात्रसंख्या एकाङ्कत्वं चैव अस्ति । अपि च डिमे षट्सु दीप्तेषु रसेषु यथा रौद्रवीरबीभत्स्येत्यादिषु अङ्गिनि सति करुणरसस्य प्राधान्यं तत्र न सिद्ध्यति ।

---

[४३] दशरूपकम् ३.६२

[४४] दशरूपकम् ३.४४-४६

[४५] कार्यं समवकारेऽपि आमुखं नाटकादिवत् ।
ख्यातं देवासुरं वस्तु निर्विमर्शास्तु सन्धयः ॥ [दशरूपकम् ३.५६]
वृत्तयो मन्दकैशिक्यो नेतारो देवदानवाः ।
द्वादशोदात्तविख्याताः फलं तेषां पृथक्पृथक् ॥ [दशरूपकम् ३.५७]

[४६] दशरूपकम् ३.५१-५३

इहामृगे तु नायकप्रतिनायकौ दिव्यस्त्रियमनिच्छन्तीम् अपहारादिना इच्छतः[४७]। अतः अत्र मूलतः स्त्रीनिमित्तकः प्रसङ्गः अपेक्षितः । कर्णभारस्य वृत्तम् तु युद्धस्य दैवस्य प्रभावस्य च परिणामेन संबद्धम् न तु शृङ्गाराभासेन वा स्त्रीहरणप्रसङ्गेन । अपि च चतुरङ्कत्वस्य नियमोऽपि अत्र उल्लङ्घितः । अतः एतेषां सर्वेषां लक्षणैः कर्णभारस्य नैव सम्बन्धः विद्यते ।

**कर्णभारस्य विशिष्टरूपकत्वनिर्धारणम्**

महाकवेः भासस्य अनवद्यलेखनीप्रसूतं 'कर्णभारम्' इति नामकं रूपकं संस्कृतसाहित्यसंसारे एकं विशिष्टं स्थानम् अलङ्करोति यस्य शास्त्रीयवर्गीकरणं नाट्यशास्त्रमर्मज्ञानां कृते एकः सुविचारणीयः विषयः वर्तते । यतोहि भरतमुनिप्रणीतनाट्यशास्त्रस्य अथवा धनञ्जयविरचितदशरूपकस्य ग्रन्थेन सम्यक् विश्लेषणेन इदं रूपकं कस्यचित् एकस्यैव वर्गस्य लक्षणैः सह पूर्णतया न सङ्गच्छते इति हेतोः अस्य स्वरूपनिर्धारणं बहुधा विवादास्पदं जातम् । तत्र आदौ तावत् यदि वयं नाटकप्रकरणभाणप्रहसनडिमसमवकारवीथी-इहामृगेति अष्टसु भेदेषु अस्य अन्तर्भावं परीक्षामहे तर्हि दृश्यते एतेषां वर्गाणां मुख्यैः नियमैः सह कर्णभारस्य स्पष्टः विरोधः विद्यते । अष्टसु भेदेषु निराकृतेषु सत्सु इदानीं परिशिष्टयोः व्यायोगोत्सृष्टिकाङ्कयोः विषये चिन्तनमावश्यकम् । व्यायोगस्य[४८] लक्षणं तावत् ख्यातेतिवृत्तत्वं पुरुषबहुलत्वञ्च यत्तु कर्णभारे पूर्णतया घटते यतोहि महाभारतस्य प्रसिद्धे युद्धे कर्णस्य प्रसङ्गः सुविदितः । अत्र स्त्रीपात्राणामभावः वर्तते यत् व्यायोगस्य एकं मुख्यं लक्षणम् । अपि च व्यायोगे एकाहवस्तुचरितम् अर्थात् एकस्य दिवसस्य घटना एव वर्णनीया । अत्रापि दृश्यते यदा कर्णः युद्धाय प्रस्थितः सन् मार्गे इन्द्रं पश्यति तदनु कवचकुण्डले ददाति ततः पुनः युद्धाय गच्छति इति सर्वं कार्यं एकस्मिन् एव दिने सम्पादितम् । किन्तु अत्र एकः सूक्ष्मः विरोधः अपि अस्ति तद्यथा व्यायोगे नायकः 'दीप्तः' अर्थात् अतिशयेन तेजस्वी उद्धतश्च भवेत् । अत्र तु कर्णः 'सशोकः' अर्थात् शोकमग्नः दृश्यते । एतत् व्यायोगस्य सामान्यप्रवृत्तेः

---

[४७] दशरूपकम् ३.६६

[४८] ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः ।
हीनो गर्भविमर्शाभ्यां दीप्तः स्युर्डिमवद्रसाः ॥ [दशरूपकम् ३.५४]
अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा ।
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः ॥ [दशरूपकम् ३.५५]

किञ्चित् विपरीतम् । अत्रैव उत्सृष्टिकाङ्कस्य[४९] नामकस्य रूपकभेदस्य लक्षणं विचारणीयं यस्य प्राणः एव भवति करुणरसः यतोहि कर्णभारे आरम्भात् एव कर्णस्य मनसि विषादः दैवस्य प्रतिकूलता अस्त्रविफलता मरणस्य निश्चितता चेति भावाः प्रवर्धमानाः । एताः प्रेक्षकाणां मनसि करुणरसस्य सञ्चारं कुर्वन्ति । उत्सृष्टिकाङ्के युद्धं न प्रत्यक्षं क्रियते अपितु वाचा एव युद्धं भवति अथवा युद्धस्य फलं शोकरूपेण वर्ण्यते । कर्णभारे अपि दृश्यते यत्र कर्णः इन्द्रेण सह 'ददातु' 'न ददातु' इति वाक्युद्धं करोति अपि च अन्ते यद्यपि सः युद्धाय गच्छति तथापि तस्य गमनं मृत्योः आलिङ्गनार्थम् एव इति प्रेक्षकाः जानन्ति । तथापि उत्सृष्टिकाङ्कस्य एकं लक्षणं तावत् तत्र 'स्त्रीपरिदेवनं' अर्थात् स्त्रीणां विलापः भवेत् तदत्र साक्षात् नास्ति किन्तु कर्णस्य एकाकित्वं तस्य मातुः कुन्त्याः स्मरणं परशुरामस्य शापस्मरणञ्चेति एते अंशाः विलापसदृशं परिमण्डलं सृजन्ति । अपरपक्षे व्यायोगे सङ्ग्रामः अवश्यं भवेत् यदत्र नेपथ्ये सूचितः । रङ्गमञ्चे दानवीरतारूपः सङ्ग्रामः प्रदर्शितः । अतः अनेके विद्वांसः मन्यन्ते यत् यद्यपि अत्र करुणरसः प्रधानः तथापि कर्णस्य स्वभावः युद्धस्य परिसरः एकाङ्कसंरचना चेति एतत् सर्वं मिलित्वा इदं रूपकं व्यायोगश्रेण्याम् एव स्थापयितुं योग्यं यत्र करुणरसः वीररसस्य पोषकः भूत्वा तिष्ठति न तु वीररसस्य नाशकः । अन्ते निष्कर्षरूपेण वक्तुं शक्यते यत् महाकविः भासः स्वकीयेन मौलिकप्रतिभाबलेन नाट्यशास्त्रस्य कठोरनियमानां भञ्जनं कृत्वा अथवा तान् अतिक्रम्य एकं नूतनं मिश्ररूपकं सृष्टवान् यत्र व्यायोगस्य शरीरम् उत्सृष्टिकाङ्कस्य चात्मा इत्यनयोः अपूर्वः संयोगः जातः । अतएव कर्णभारं नाम रूपकं करुणरसप्रधानः व्यायोगः इति अभिधानेन अभिहितं चेत् तदेव सर्वाधिकं समीचीनं वैज्ञानिकं च भविष्यति यस्मिन् उभयोः भेदयोः गुणाः समाविष्टाः ।

**उपसंहारः**

प्रदत्तं समग्रं रूपकत्वविषयकं विवेचनम् आलोक्येदं सुस्पष्टतया अधिगम्यते यत् नाट्यसाहित्यस्य परम्परासु अद्वितीयप्रतिभासम्पन्नस्य

---

[४९] उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्ध्या प्रपञ्चयेत् ।
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः ॥ [दशरूपकम् ३.६४]
भाणवत् सन्धिवृत्त्यङ्गैर्युक्तः स्त्रीपरिदेवितैः ।
वाचा युद्धं विधातव्यं तथा जयपराजयौ ॥ [दशरूपकम् ३.६५]

महाकविना भासेन विरचितं 'कर्णभारम्' इति रूपकम् कर्णस्य जीवनस्य एकस्मिन् करुणवीरभावसङ्कटे समुपस्थितायाः क्षणभङ्गुरतायाः शाश्वतत्वस्य च निरूपणप्रयोजनेन उत्प्रेरितम् । यद्यपि नाट्यलक्षणस्य मन्दबुद्धीनां कृते उपस्थापनाय धनञ्जयेन प्रणीते दशरूपकग्रन्थे रसाश्रितं रूपकं दशधा विभक्तम् इति शास्त्रीयसिद्धान्तः प्रतिपादितः तथापि भासस्य एतत् रूपकं तत्तत्भेदानां कठोरनियमान् अतिक्रम्य वर्तते इति अस्माभिः विश्लेषितम् । तत्र हि प्रथमं तावत् नाटकं प्रकरणं च नाम रूपकद्वयं पञ्चाङ्कतः दशाङ्कं यावत् अङ्कबाहुल्येन अपेक्षितं तस्य नियमात् 'कर्णभारम्' इति एकाङ्कपरिमितं रूपकं निषिद्धं जातम् । तथा च चतुरङ्कत्वनियमस्य उल्लङ्घनहेतोः इहामृगस्य श्रेणीतः अपि बहिष्कृतम् । अपरञ्च प्रहसनस्य हास्यरस-प्राधान्येन विकृताकृतिपात्रनियमैश्च सह कर्णस्य शोकगम्भीरं प्रख्यातराजेन्द्रमौलिमणिरञ्जितपादपद्मसम्पन्नं चरित्रं मेलयितुं न शक्यते इति कृत्वा प्रहसनम् अपि अस्य वर्गः भवितुं नार्हति । तथैव वीथ्याः शृङ्गाररससूचकत्वेन कैशिकीवृत्तिनिबद्धत्वेन भाणस्य एकविटपात्रमात्रेण आकाशभाषितैश्च उपस्थापनानियमत्वात् कर्णभारे बहुभिः पात्रैः क्रियमाणः परस्परवाग्व्यापारः तल्लक्षणं सर्वथा बाधितः इति । डिमसमवकारयोः च नायकबाहुल्येन त्र्यङ्कचतुरङ्कापेक्षया च कर्णभारस्य एकाङ्कत्वं एकनायकत्वमेव विरोधीति निरूपितम् । एवम् अष्टसु रूपकेषु अस्य असमावेशः सुस्पष्टतया निर्धारितः । तदनन्तरम् अवशिष्टयोः व्यायोग-उत्सृष्टिकाङ्कयोः एव कर्णभारस्य अन्तर्भावस्य सम्भावनाविषये साग्रहं चिन्तनं विहितम् ।

एकाङ्कत्वैकाहाचरितत्वख्यातेतिवृत्तत्वास्त्रीनिमित्तसङ्ग्रामेण च व्यायोगः इति भेदस्य शरीरलक्षणैः इदं रूपकं सर्वथा साम्यं भजते । यद्यपि व्यायोगे अपेक्षितः दीप्तः उत्साहसहितवीररसः अत्र शोकस्य बाहुल्येन न्यूनतां प्राप्तवान् इति कश्चन सूक्ष्मः विरोधः प्रबुद्धैः विभाव्यते । किन्तु उत्सृष्टिकाङ्कस्य लक्षणानि तु कर्णभारेण सर्वाधिकतया अनुसृतानि इति वक्तुं शक्यते यतोहि तत्र करुणरसस्य स्थायी भावः शोकः अत्र गुरुशापजनितवैधुर्यास्त्रनिर्वीर्यत्वमातृवचनदुःखैः इत्येतैः विभावैः अनुभावैश्च सम्यक्तया पुष्टः सन् परमोत्कर्षमुपनीतः । अपि च युद्धस्य साक्षात् प्रदर्शनं तत्र निषिद्धं भवति तस्य स्थाने च वाग्युद्धस्य प्राधान्यम् अपेक्षितं यदत्र कर्णशक्रयोः मध्ये कवचकुण्डलयाचनाप्रत्याख्यानविषये कृतस्य

वाग्व्यापारस्य चरमसीमया सम्यक् साधितम् । अतः अन्ते सारभूतं निष्कर्षं निष्कासयितुं शक्यते यत् महाकविना भासेन स्वकीयमौलिकप्रतिभाबलेन नाट्यशास्त्रस्य नियमशृङ्खलान् शिथिलीकृत्य एका नूतना एव विधा प्रवर्तिता । यद्यपि संरचनादृष्ट्या इदं रूपकं व्यायोगः इति भेदेन तुलनीयम् तथापि भावगाम्भीर्यदृष्ट्या मुख्यरसस्य प्राधान्येन इदमुत्सृष्टिकाङ्कमिति भेदस्य आत्मना सह सम्पूर्णतया सन्निविष्टं जातम् । अतएव इदं रूपकं करुणरसप्रधानः व्यायोगः इति अभिधानेन शास्त्रीयैः समालोचकैः सङ्केतितं सत् भासस्य नाट्यकौशलस्य मानवीमनोभावचित्रणनैपुण्यस्य च चरमसीमां दर्शयति येन इदं लघुरूपकमपि संस्कृतसाहित्यगगने ध्रुवतारा इव दीप्यमानं तिष्ठति ।

✶ ✶ ✶

## Bibliography


1. *दशरूपकम्* (धनञ्जयविरचिता कारिका, धनिककृता वृत्तिः, कारिकावृत्त्योः बङ्गानुवादः, 'विवृतिः' नाम्ना व्याख्यया च सहिता) ; धनञ्जयः ; धनिकः (वृत्तिः.टीकाकारः) ; ड. सीतानाथः आचार्यः (अनुवादकः) ; ड. देवकुमारः दासः (सम्पादकः) ; संस्कृतपुस्तकभाण्डारः ; कलिकाता ; २०१६ ।
2. *दशरूपकम् धनिककृतयाऽवलोकव्याख्यया समेतम्*; धनञ्जयः ; धनिकः (अवलोक व्याख्या) ; ड. श्रीनिवासः शास्त्री (सम्पादकः अनुवादकश्च) ; साहित्यभाण्डारः ; उत्तरप्रदेशः ; १९८९ ।
3. *महाकविभासप्रणीतं कर्णभारम्* (सरला-हिन्दी-व्याख्या-आंग्लानुवादः टिप्पणी भूमिकादिसहितः) ; भासः ; ड. सुधाकर मालवीय (व्याख्याकारः, अनुवादकः, सम्पादकः) ; चौखम्भा ओरियन्टालिया ; वाराणसी ; १९७५ ।
4. *महाकविभासप्रणीतं कर्णभारम्*; भासः ; ड. पुरीप्रिया कुण्डुः (व्याख्याकारः.अनुवादकः.सम्पादकः) ; संस्कृतपुस्तकभाण्डारः ; कलिकाता ; २०१५ ।


✳ ✳ ✳